**शक्रः**:- (आत्मगतम्) किं नु खलु मया वक्तव्यं, यदि दीर्घायुर्भवेति वक्ष्ये दीर्घायुर्भविष्यति। यदि न वक्ष्ये मूढ़ इति मां परिभवति। तस्मादुभयं परिहृत्य किं नु खलु वक्ष्यामि। भवतु दृष्टम् (प्रकाशम्) भो कर्ण ! सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः।

**कर्णः**:- भगवन् ! किं न वक्तव्यं दीर्घायुर्भवेति। अथवा एतदेव शोभनम्। कुतः -

**धर्मो हि यत्नैः पुरुषेण साध्यो भुजङ्गजिह्वाचपला नृपश्रियः।**
**तस्मात्प्रजापालनमात्रबुद्ध्या हतेषु देहेषु गुणा धरन्ते ॥**

भगवन्, किमिच्छसि। किमहं ददामि।

**शक्रः**:- महत्तरां भिक्षां याचे।

**कर्णः**:- महत्तरां भिक्षां भवते प्रदास्ये। सालङ्कारं गोसहस्रं ददामि।

**शक्रः**:- गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण ! नेच्छामि।

**कर्णः**:- किं नेच्छति भवान्। इदमपि श्रूयताम्। बहुसहस्रं वाजिनां ते ददामि।

**शक्रः**:- अश्वमिति। मुहूर्तकम् आरोहामि। नेच्छामि कर्ण! नेच्छामि।

**कर्णः**:- किं नेच्छति भगवान्। अन्यदपि श्रूयताम्। वारणानामनेकं वृन्दमपि ते ददामि।

**शक्रः**:- गजमिति। मुहूर्तकम् आरोहामि। नेच्छामि कर्ण! नेच्छामि।

**कर्णः**:- किं नेच्छति भवान्। अन्यदपि श्रूयताम्, अपर्याप्तं कनकं ददामि।

**शक्रः**:- गृहीत्वा गच्छामि। (किंचिद् गत्वा) नेच्छामि कर्ण! नेच्छामि।

**कर्णः**:- तेन हि जित्वा पृथिवीं ददामि।

**शक्रः**:- पृथिव्या किं करिष्यामि।

**कर्णः**:- तेन ह्यग्निष्टोमफलं ददामि।

**शक्रः**:- अग्निष्टोमफलेन किं कार्यम्।

**कर्णः**:- तेन हि मच्छिरो ददामि।

**शक्रः**:- अविहा अविहा।

**कर्णः**:- न भेतव्यं न भेतव्यम्। प्रसीदतु भवान्। अन्यदपि श्रूयताम्।

अङ्गैः सहैव जनितं मम देहरक्षा
देवासुरैरपि न भेद्यमिदं सहस्रैः।
देयं तथापि कवचं सह कुण्डलाभ्यां
प्रीत्या मया भगवते रुचितं यदि स्यात्॥

**शक्रः-** (सहर्षम्) ददातु, ददातु।

**कर्णः-** (आत्मगतम्) एष एवास्य कामः। किं नु खल्वनेककपटबुद्धेः कृष्णस्योपायः। सोऽपि भवतु। धिगयुक्तमनुशोचितम्। नास्ति संशयः। (प्रकाशम्) गृह्यताम्।

**शल्यः-** अङ्गराज ! न दातव्यं न दातव्यम्।

**कर्णः-** शल्यराज ! अलमलं वारयितुम् । पश्य -

शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः।
जलं जलस्थानगतं च शुष्यति।
हुतं च दत्तं च तथैव तिष्ठति।

तस्मात् गृह्यताम् (निकृत्त्य ददाति)।

## शब्दार्थाः

| | | |
|---|---|---|
| निवर्त्य | गत्वा | जाकर |
| प्रीतः | प्रसन्नः | खुश |
| महत्तराम् | अधिकतराम् | और बड़ी |
| वक्ष्ये | कथयिष्यामि | कहूँगा |
| परिहृत्य | परिहारं कृत्वा | हटाकर |
| इव | सदृश | जैसा, समान |
| भुजङ्गः | सर्पः | सांप |

| | | | | |
|---|---|---|---|---|
| क्षीरम् | – | दुग्धम् | – | दूध |
| वाजिन् | – | अश्वः | – | घोड़ा |
| वारणः | – | गजः | – | हाथी |
| कनकम् | – | स्वर्णम् | – | सोना |
| असुरः | – | दैत्यः | – | राक्षस |
| कामः | – | इच्छा | – | इच्छा |
| पादपाः | – | वृक्षाः | – | पेड़ |
| निकृत्य | – | खण्डयित्वा | – | काटकर |
| मूढः | – | मूर्खः | – | मूर्ख |
| वृन्दम् | – | समूहम् | – | समूह |
| दत्तम् | – | दानम् | – | दान |

## व्याकरणम्

ABDIEL SOLUTIONS ABSOL ★PATNA★

### सन्धिविच्छेदः

| | | |
|---|---|---|
| सूर्येणैव | – | सूर्येण + एव |
| प्रीतोऽस्मि | – | प्रीतः + अस्मि |
| नमस्करोमि | – | नमः + करोमि |
| दीर्घायुर्भवेति | – | दीर्घ + आयुः + भव + इति |
| दीर्घायुर्भविष्यति | – | दीर्घ + आयुः + भविष्यति |
| तस्मादुभयम् | – | तस्मात् + उभयम् |
| एतदेव | – | एतत् + एव |
| सालङ्कारम् | – | स + अलङ्कारम् |
| नेच्छामि | – | न + इच्छामि |

| | | |
|---|---|---|
| नेच्छति | – | न + इच्छति |
| अन्यदपि | – | अन्यत् + अपि |
| किंचिद् | – | किम् + चित् |
| ह्यग्निष्टोमफलम् | – | हि + अग्निष्टोमफलम् |
| मच्छिरः | – | मत् + शिरः |
| सहैव | – | सह + एव |
| देवासुरैरपि | – | देव + असुरैः + अपि |
| तथापि | – | तथा + अपि |
| एवास्य | – | एव + अस्य |
| खल्वनेककपटबुद्धेः | – | खलु + अनेककपटबुद्धेः |
| कृष्णस्योपायः | – | कृष्णस्य + उपायः |
| सोऽपि | – | सः + अपि |
| धिगयुक्तम् | – | धिक् + अयुक्तम् |
| तथैव | – | तथा + एव |

SOLUTIONS ABSOL PATNA

**प्रकृतिप्रत्ययविभागः**

| | | |
|---|---|---|
| उपगम्य | – | उप + गम् + ल्यप् |
| वक्तव्यम् | – | वच् + तव्यत् |
| परिहृत्य | – | परि + हृ + ल्यप् |
| निवर्त्य | – | नि + वृत् + णिच् + ल्यप् |
| गृहीत्वा | – | ग्रह् + क्त्वा |
| गत्वा | – | गम् + क्त्वा |
| जित्वा | – | जि + क्त्वा |

कार्यम् - कृ + ण्यत्

भेतव्यम् - भी + तव्यत्

वारयितुम् - वृ + णिच् + तुमुन्

निकृत्य - नि + कृन्त् + ल्यप्

**समासः**

दीर्घायुः - दीर्घम् आयुः यस्य सः, बहुव्रीहिः

अग्निष्टोमफलम् - अग्निष्टोमस्य (यज्ञस्य) फलम्, षष्ठी तत्पुरुषः

मच्छिरः - मम शिरः, षष्ठी तत्पुरुषः

गोसहस्रम् - गवां सहस्रम्, षष्ठी तत्पुरुषः

सालङ्कारम् - अलङ्कारेण सहितम्, सहार्थकबहुव्रीहिः

भुजङ्गजिह्वा - भुजङ्गस्य जिह्वा, षष्ठी तत्पुरुषः

जिह्वाचपला - जिह्वा इव चपला, उपमानपूर्वपद कर्मधारयः

देहरक्षा - देहस्य रक्षा, षष्ठी तत्पुरुषः

कालपर्ययात् - कालस्य पर्ययः (परिवर्तनम्) तस्मात्, षष्ठी तत्पुरुषः

सुबुद्धमूलाः - सुबुद्धं मूलं येषां ते, बहुव्रीहिः

जलस्थानगतम् - जलस्य स्थानं जलस्थानम्, षष्ठी तत्पुरुषः, तद् गतम्, द्वितीया तत्पुरुषः।

सहर्षम् - हर्षेण सहितम् (सहार्थक बहुव्रीहिः) यथा स्यात् तथा (क्रियाविशेषणम्)

आत्मगतम् - आत्मानं गतम्, द्वितीया तत्पुरुषः

शल्यराजः - शल्यानां राजा, षष्ठी तत्पुरुषः

## अभ्यासः

### ( मौखिकः )

1. अधोलिखितानां पदानां पर्यायवाचिपदानि वदत -

मूढः, वाजिन्, वारणः, क्षीरम्, भुजङ्गः, कनकम्

2. अधोलिखितानां पदानां प्रकृति-प्रत्यय-विभागं वदत -

वक्तव्यम्, उपगम्य, इच्छामि, श्रूयताम् वाजिनाम्

3. विपरीतार्थकान् शब्दान् वदत -

दीर्घायुः, प्रीतः, दत्वा, यशः, प्रविशति

4. सन्धिविच्छेदं कुरुत -

सूर्येणैव, एतदेव, प्रीतोऽस्मि, तस्मादुभयम्, नेच्छामि

## अभ्यासः

### ( लिखितः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

(क) ततः ब्राह्मणरूपेण कः प्रविशति ?

(ख) कर्णः प्रथमं किं दातुम् इच्छति स्म ?

(ग) कालपर्ययात् का क्षयं गच्छति ?

(घ) कर्णः कस्य देशस्य राजा आसीत् ?

(ङ) किं तथैव तिष्ठति ?

2. निम्नलिखितेषु वाक्येषु रेखाङ्कितपदानां स्थाने कोष्ठात् उचितरूपम् आदाय प्रश्ननिर्माणं कुरुत -

(क) ततः प्रविशति ब्राह्मणरूपेण <u>शक्रः</u>। (कः / का)

(ख) महत्तरां <u>भिक्षां</u> याचे। (किं / काम्)

(ग) मुहूर्तकं <u>क्षीरं</u> पिबामि। (कम् / किम्)

(घ) सुबद्धमूलाः <u>पादपाः</u> निपतन्ति। (कः / के)

(ङ) जलस्थानगतं <u>जलं</u> शुष्यति। (का / किम्)

3. **अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत -**

च, एव, अपि, यदि, इव

(क) ........................ न वक्ष्ये मूढ इति मां परिभवति ।

(ख) एष ........................ अस्य कामः ।

(ग) सूर्यः ........................ तिष्ठतु ते यशः ।

(घ) इदं देवासुरैः ........................ न भेद्यम् ।

(ङ) जलं जलस्थानगतं ........................ शुष्यति ।

4. **सन्धिः सन्धिविच्छेदं वा कुरुत -**

(क) मच्छिरो

(ख) दीर्घायुर्भवेति

(ग) हि + अग्निष्टोमफलम्

(घ) अन्यत् + अपि

(ङ) कृष्णस्योपायः

(च) सः + अपि

(छ) सहैव

(ज) धिक् + अयुक्तम् + अनुशोचितम्

5. **अधोलिखितानां पदानां प्रकृति-प्रत्यय-विभागं कुरुत--**

गृहीत्वा, दातव्यम्, वारयितुम्, जित्वा, परिहृत्य ।

6. **अधोलिखितानां पदानां स्ववाक्येषु संस्कृतभाषायां प्रयोगं कुरुत -**

कर्णः, क्षीरम्, अश्वः, करिष्यामि, इच्छसि ।

7. अधोलिखितपदेषु मूलशब्दं विभक्तिं वचनं च लिखत -

| | मूलशब्दः - | विभक्तिः - | वचनम् |
|---|---|---|---|
| **यथा - तेन** | तत् - | तृतीया - | एकवचनम् |

1. पृथिव्याः -
2. सुरैः -
3. कृष्णस्य -
4. देहेषु -
5. वृक्षात् -
6. पादपाः -
7. जलम् -
8. भिक्षाम् -
9. पुरुषेण -
10. धर्मः -

8. 'क' स्तम्भे प्रदत्तानां पदानां 'ख' स्तम्भे लिखितपदैः सह समुचितं मेलनं कुरुत -

| क | ख |
|---|---|
| (क) गोसहस्रम् | पादपाः |
| (ख) अश्वम् | दानवीरः |
| (ग) कर्णः | आरोहणम् |
| (घ) सुबद्धमूलाः | क्षीरम् |
| (ङ) महत्तराम् | ब्राह्मणवेशधारी |
| (च) शक्रः | भिक्षाम् |

ABDIEL SOLUTIONS
ABSOL
PATNA

9. अधोलिखितानि रेखाङ्कितपदानि बहुवचने परिवर्तयत -

उदाहरणम् - एकवचने - <u>तस्मै</u> फलं ददाति।

बहुवचने - तेभ्यः फलं ददाति।

(क) <u>इदम्</u> अपि श्रूयताम्।

(ख) कनकं गृहीत्वा गच्छामि।

(ग) सः <u>कार्यं</u> करोति।

(घ) किं नु खलु <u>मया</u> वक्तव्यम्।

(ङ) इदं <u>पुरुषस्य</u> कार्यम्।

10. **स्तम्भद्वये लिखितानां विपरीतार्थकशब्दानां मेलनं कुरुत -**

| | क | ख |
|---|---|---|
| (क) | महत्तराम् | अल्पायुः |
| (ख) | प्रीतः | दाता |
| (ग) | याचकः | दुःखितः |
| (घ) | दीर्घायुः | लघुतराम् |
| (ङ) | मूढः | अपयशः |
| (च) | यशः | विद्वान् |
| (छ) | गत्वा | नास्ति |
| (ज) | अस्ति | आगत्य |

11. **निम्नलिखितेषु पदेषु प्रयुक्तां विभक्तिं लिखत -**

अङ्गैः, प्रीत्या, अस्य, संशयः, पृथिव्या, देहेषु, गजम्।

## योग्यताविस्तारः

'महाभारतम्' धार्मिक ऐतिहासिकश्च ग्रन्थः अस्ति। अस्मिन् ग्रन्थे भरतवंशीयानां कौरवानां पाण्डवानां च चरितं वर्णितमस्ति। ग्रन्थस्यास्य विकासस्य त्रीणि सोपानानि सन्ति -

1. 'जयः' (श्लोकसंख्या 8800)
2. 'भारतम्' (श्लोकसंख्या 24000)

3. 'महाभारतम्' (श्लोकसंख्या 100000)

ग्रन्थेऽस्मिन् अष्टादश पर्वाणि सन्ति -

| | | |
|---|---|---|
| 1. आदिपर्व | 2. सभापर्व | 3. वनपर्व |
| 4. विराटपर्व | 5. उद्योगपर्व | 6. भीष्मपर्व |
| 7. द्रोणपर्व | 8. कर्णपर्व | 9. शल्यपर्व |
| 10. सौप्तिकपर्व | 11. स्त्रीपर्व | 12. शान्तिपर्व |
| 13. अनुशासनपर्व | 14. आश्वमेधिकपर्व | 15. आश्रमवासिकपर्व |
| 16. मौसलपर्व | 17. महाप्रस्थानिकपर्व | 18. स्वर्गारोहणपर्व |

□